कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ पञ्चम काण्डे पञ्चमः प्रश्नः॥

हरिः ओम्॥ यदेकेन सग्ग्स्थापयति यज्ञस्य सन्तत्या अविच्छेदायैन्द्राः पशवो ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आ लभ्यन्ते देवताभ्यः समदं दधात्याग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्यदाग्नेयीस्तेनाऽऽग्नेया यत्त्रिष्टुभस्तेनैन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्माद्यद्रियङ् वायु- [१] र्वाति तद्रियङ्ङग्निर्दहति स्वमेव तत्तेजोऽन्वेति यन्न नियुत्वते स्यादुन्माद्येद्यजमानो नियुत्वते भवति यजमानस्याऽनुन्मादाय वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय हिरण्यगर्भः समवर्तताऽग्र इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय सर्वाणि वा एष रूपाणि पशूनां प्रत्या लभ्यते यच्छमश्रुणस्तत्- [२] पुरुषाणाग्ं रूपं यत्तूपरस्तदश्वानां यदन्यतोदन्तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानां वायुर्वै पशूनां प्रियं धाम यद्वायव्यो भवत्येतमेवैनमभि संजानानाः पशव उप तिष्ठन्ते वायव्यः कार्या३ः प्राजापत्या ३ इत्याहुर्यद्वायव्यं कुर्यात्प्रजापतेरियाद्यत्प्राजापत्यं कुर्याद्वायो- [३] रियाद्यद्वायव्यः पशुर्भवति तेन वायोर्नैति यत्प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद्द्वादशकपालस्तेन वैश्वानरान्नैत्याग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽऽ रभतेऽग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता [४] एवोभयतः

परिगृह्य यजमानोऽव रुन्धे पुरोडाशेन वै देवा अमुष्मिँल्लोक आर्ध्नुवञ्चरुणाऽस्मिन् यः कामयेताऽमुष्मिँल्लोक ऋध्नुयामिति स पुरोडाशं कुर्वीताऽमुष्मिन्नेव लोक ऋध्नोति यदष्टाकपालस्तेनाऽग्नेयो यत्त्रिकपालस्तेन वैष्णवः समृद्ध्यै यः कामयेताऽस्मिँल्लोक ऋध्नुयामिति स चरुं कुर्वीताऽग्नेर्घृतं विष्णोस्तण्डुलास्तस्मा- [५] च्चरुः कार्योऽस्मिन्नेव लोक ऋध्नोत्यादित्यो भवतीयं वा अदितिरस्यामेव प्रति तिष्ठत्यथो अस्यामेवाऽधि यज्ञं तनुते यो वै संवथ्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामि गर्भोऽवपद्यते तादृगेव तदार्तिमार्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेथ्संवथ्सरो वा अग्निर्वैश्वानरो यथा संवथ्सरमाप्त्वा [६] काल आगते विजायत एवमेव संवथ्सरमाप्त्वा काल आगतेऽग्निं चिनुते नाऽर्तिमार्छत्येषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवाऽस्य तनुवमव रुन्धे त्रीण्येतानि हवीग्ंषि भवन्ति त्रय इमे लोका एषां लोकानाग्ं रोहाय॥[७]

*यद्रियड़् फ़ायुर्यच्छमश्रुणस्तद्वायोर्निर्वपति देवतास्तस्मादाप्त्वाऽष्टात्रिग्ंशच्च॥**5.5.1***॥

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनु प्राऽविशत्ताभ्यः पुनः सम्भवितुं नाऽशक्नोथ्सोऽब्रवीदृध्नवदिथ्स यो मेऽतः पुनः संचिनवदिति तं देवाः समचिन्वन्ततो वै त आर्ध्नुवन् यथ्समचिन्वन्तच्चित्यस्य चित्यत्वं य एवं विद्वानग्निं चिनुत ऋध्नोत्येव कस्मै कमग्निश्चीयत इत्याहुरग्निवा- [८] नसानीति वा अग्निश्चीयतेऽग्निवानेव भवति कस्मै कमग्निश्चीयत इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते विदुरेनं देवाः कस्मै कमग्निश्चीयत इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्नि- [९] श्चीयते

पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिँल्लोक उप जीवन्ति प्रजापतिरग्निमचिकीषत तं पृथिव्यब्रवीन्न मय्यग्निं चेष्यसेऽति मा धक्ष्यति सा त्वाऽतिदह्यमाना वि धविष्ये [१०] स पापीयान्भविष्यसीति सोऽब्रवीत्तथा वा अहं करिष्यामि यथा त्वा नाऽतिधक्ष्यतीति स इमामभ्यमृशत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाऽधत्ताऽनतिदाहाय यत्प्रत्यग्निं चिन्वीत तदभि मृशेत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदे– [११] तीमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत्तग्ं संवथ्सरमबिभस्ततो वै स प्राऽजायत तस्माथ्संवथ्सरं भार्यः प्रैव जायते तं वसवोऽब्रुवन्प्र त्वमजनिष्ठा वयम्प्र जायामहा इति तं वसुभ्यः प्राऽयच्छत्तं त्रीण्यहान्यबिभरुस्तेन [१२] त्रीणि च शतान्यसृजन्त त्रयस्त्रिग्ंशतं च तस्मात्त्र्यहं भार्यः प्रैव जायते तान्रुद्रा अब्रुवन्प्र यूयमजनिद्ध्वं वयम्प्र जायामहा इति तग्ं रुद्रेभ्यः प्राऽयच्छन्तग्ं षडहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिग्ंशतं च तस्मात्षडहं भार्यः प्रैव जायते तानादित्या अब्रुवन्प्र यूयमजनिद्ध्वं वयं [१३] प्र जायामहा इति तमादित्येभ्यः प्राऽयच्छन्तं द्वादशाऽहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिग्ंशतं च तस्माद्द्वादशाहं भार्यः प्रैव जायते तेन वै ते सहस्रमसृजन्तोखाग्ं सहस्रतमीं य एवमुख्यग्ं साहस्रं वेद प्र सहस्रं पशूनाप्नोति॥ [१४]

अग्निवान्पशुमानसानीति वा अग्निर्ध्विष्ये मृशोत्प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वध्रुवा सीद तेन तानादित्या अब्रुवन्प्र यूयमजनिद्ध्वं वयञ्चत्वारिग्ंशच्च॥5.5.2॥

यजुषा वा एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यदुखा सा वा एषैतर्हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाग्ं इत्युखायां जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेनाऽयातयाम्नी यो वा अग्निं योग आगते युनक्ति युङ्क्ते युञ्जानेष्वग्ने [१५] युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाग्ं इत्याहैष वा अग्नेर्योगस्तेनैवैनं युनक्ति युङ्क्ते युञ्जानेषु ब्रह्मवादिनो वदन्ति न्यङ् ङग्निश्चेतव्या ३ उत्ताना ३ इति वयसां वा एष प्रतिमया चीयते यदग्निर्यन्न्यञ्चं चिनुयात्पृष्टित एनमाहुतय ऋच्छेयुर्यदुत्तानं न पतितुग्ं शक्नुयादसुवर्ग्योऽस्य स्यत्प्राचीनमुत्तानं [१६] पुरुषशीर्षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति सौर्या जुहोति चक्षुरेवाऽस्मिन्प्रति दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति समानग्ं हि चक्षुः समृद्ध्यै देवासुराः संयत्ता आसन्ते वामं वसु सं न्यदधत तद्देवा वामभृताऽवृञ्जत तद्वामभृतो वामभृत्त्वं यद्वामभृतमुपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते हिरण्यमूर्ध्नी भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैवाऽस्य ज्योतिर्वामं वृङ्क्ते द्वियजुर्भवति प्रतिष्ठित्यै॥[१७]

युञ्जानेष्वग्ने प्राचीनमुत्तानं वामभृतञ्जतुर्विग्ंशतिश्च॥5.5.3॥

आपो वरुणस्य पत्नय आसन्ता अग्निरभ्यध्यायत्ताः समभवत्तस्य रेतः पराऽपतत्तदियमभवद्यद्द्वितीयम्परापतत्तदसावभवदियं वै विराडसौ स्वराड्यद्विराजावुपदधातीमे एवोप धत्ते यद्वा असौ रेतः सिञ्चति तदस्यां प्रति तिष्ठति तत्प्र जायते ता ओषधयो [१८] वीरुधो भवन्ति ता अग्निरत्ति य एवं वेद प्रैव

जायतेऽन्नादो भवति यो रेतस्वी स्यात्प्रथमायां तस्य चित्यामुभे उप दध्यादिमे एवास्मै समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात्प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्याग्ं रेत एवाऽस्य सिक्तमाभ्यामुभयतः परि गृह्णाति संवथ्सरं न क- [१९] ञ्चन प्रत्यवरोहेन्न हीमे कं चन प्रत्यवरोहतस्तदेनयोर्व्रतं यो वा अपशीर्षाणमग्निं चिनुतेऽपशीर्षामुष्मिँल्लोके भवति यः सशीर्षाणं चिनुते सशीर्षामुष्मिँल्लोके भवति चित्तिं जुहोमि मनसा घृतेन यथा देवा इहाऽऽगमन्वीतिहोत्रा ऋतावृधः समुद्रस्य वयुनस्य पत्मञ्जुहोमि विश्वकर्मणे विश्वाऽहाऽमर्त्यग्ं हविरिति स्वयमातृण्णामुपधाय जुहोत्ये- [२०] तद्वा अग्नेः शिरः सशीर्षाणमेवाऽग्निं चिनुते सशीर्षाऽमुष्मिँल्लोके भवति य एवं वेद सुवर्गाय वा एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तथ्सुवर्ग्योऽग्निश्चितिमुपधायाऽभि मृशेच्चित्तिमचित्तिं चिनवद्विवि द्वान्पृष्ठेव वीता वृजिना च मर्तान्राये च नः स्वपत्याय देव दितिं च रास्वाऽदितिमुरुष्येति यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति॥[२१]

*ओषधयः कञ्जुहोति स्वपत्यायाऽष्टादश च||**5.5.4***||

विश्वकर्मा दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नमः प्रजापती रुद्रो वरुणोऽग्निर्दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नम एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनो [२२] वदन्त्यग्नौ ग्राम्यान्पशून्प्र दधाति शुचाऽऽरण्यानर्पयति किं तत उच्छिग्ंषतीति यद्धिरण्येष्टका

उपदधात्यमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान् हिनस्ति प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयाऽपानस्तृतीयाऽनु प्राऽण्यात्प्रथमाग् स्वयमातृण्णामुपधाय प्राणेनैव प्राणग्ं समर्धयति व्यन्याद्- [२३] द्वितीयामुपधाय व्यानेनैव व्यानग्ं समर्धयत्यऽपान्यात्तृतीयामुपधायाऽपानेनैवाऽपानग्ं समर्धयत्यथो प्राणैरेवैनग्ं समिन्धे भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राऽजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु [२४] लोकेष्वधि प्र जायते प्राणाय व्यानायाऽपानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदाऽग्निना वै देवाः सुवर्गं लोकमजिगाग्ंसन्तेन पतितुं नाऽशक्नुवन्त एताश्चतस्रः स्वयमातृण्णा अपश्यन्ता दिक्षूपाऽदधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः सुवर्गं लोकमेति॥[२५]

ब्रह्मवादिनो व्यन्यादेषु यजमानस्त्रीणि च॥5.5.5॥

अग्न आ याहि वीतय इत्याहाऽह्वतैवैनमग्निं दूतं वृणीमह इत्याह हूत्वैवैनं वृणीतेऽग्निनाऽग्निः समिध्यत इत्याह समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह समिद्ध एवाऽस्मिन्निन्द्रियं दधात्यग्नेः स्तोमं मनामह इत्याह मनुत एवैनमेतानि वा अह्नाग्ं रूपाण्य- [२६] न्वहमेवैनं चिनुतेऽवाऽह्नाग्ं रूपाणि रुन्धे ब्रह्मवादिनो वदन्ति कस्माथ्सत्याद्यातयाम्नीरन्या इष्टका अयातयाम्नी लोकं पृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां बृहस्पतिश्चाऽयातयामानोऽनुचरवती

भवत्यजामित्वायाऽनुष्टुभाऽनु चरत्यात्मा वै लोकं पृणा प्राणोऽनुष्टुप्तस्मात्प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य सूददोहस [२७] इत्याह तस्मात्परुषिपरुषि रसः सोमग्ग् श्रीणन्ति पृश्नय इत्याहाऽन्नं वै पृश्न्यन्नमेवाऽव रुन्धेऽर्को वा अग्निरर्कोऽन्नमन्नमेवाऽव रुन्धे जन्मन्देवानां विशस्त्रिष्वा रोचने दिव इत्याहेमानेवाऽस्मै लोकाञ्ज्योतिष्मतः करोति यो वा इष्टकानां प्रतिष्ठां वेद प्रत्येव तिष्ठति तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति॥[२८]

रूपाणि सूददोहसस्तया षोडश च॥5.5.6॥

सुवर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं मिनुयाद्वज्रेणैनग्ं सुवर्गाल्लोकादन्तर्दध्याद्यन्न मिनुयाथ्स्वरुभिः पशून्व्यर्धयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून्व्यर्धयति वि वा एष इन्द्रियेण वीर्येणर्ध्यते योऽग्निं चिन्वन्नधि क्रामत्यैन्द्रिय- [२९] र्चाऽऽ क्रमणं प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृध्यते रुद्रो वा एष यदग्निस्तस्य तिस्रः शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष आ वृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोत्यतिथो ताभ्य एवाऽऽत्मानं निष्क्रीनीते यत्ते रुद्र पुरो [३०] धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र संवथ्सरेण नमस्करोमि यत्ते रुद्र दक्षिणा धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र परिवथ्सरेण नमस्करोमि यत्ते रुद्र पश्चाद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्रेदावथ्सरेण नमस्करोमि यत्ते रुद्रोत्तराद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्रेदुवथ्सरेण

नमस्करोमि यत्ते रुद्रोपरि धनुस्त- [३१] द्वातो अनु वातु ते तस्मै ते रुद्र वथ्सरेण नमस्करोमि रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि संचितमेतैरुप तिष्ठते नमस्कारैरेवैनग्ं शमयति येऽग्नयः [३२] पुरीष्याः प्रविष्टाः पृथिवीमनु। तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव॥ आपन्त्वाग्ने मनसाऽऽपन्त्वाऽग्ने तपसाऽऽपन्त्वाऽग्ने दीक्षयाऽऽपन्त्वाऽग्न उपसद्भिरापन्त्वाऽग्ने सुत्ययापन्त्वाग्ने दक्षिणाभिरापन्त्वाऽग्नेऽवभृथेनाऽऽपन्त्वाग्ने वशयाऽऽपन्त्वाऽग्ने स्वगाकारेणेत्याहैषा वा अग्नेराप्तिस्तयैवैनमाप्नोति॥[३३]

*ऐन्द्रिया पुर उत्तराधनुस्तदग्नय आहाऽष्टौ च॥**5.5.7**॥*

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवाऽस्मिन्दधाति बृहद्रथंतराभ्यां पक्षावोज एवाऽस्मिन्दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवाऽस्मिन्दधाति प्रजापतिरग्निमसृजत सोऽस्माथ्सृष्टः पराङैत्तं वारवन्तीयेनाऽवारयत तद्वारवन्तीयस्य वारवन्तीयत्वग्ग् श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वं [३४] यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनग्ग् श्यैतेन श्येती कुरुते प्रजापतेर्हृदयेनाऽपिपक्षम्प्रत्युप तिष्ठते प्रेमाणमेवाऽस्य गच्छति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाऽग्निना देवतयाऽग्नेः शीर्ष्णाऽग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसेन्द्रेण देवतयाऽग्नेः पक्षेणाऽग्नेः पक्षमुप दधामि प्रतीच्या त्वा दिशा सादयामि [३५] जागतेन छन्दसा सवित्रा देवतयाऽग्नेः पुच्छेनाऽग्नेः पुच्छमुप दधाम्युदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतयाऽग्नेः पक्षेणाऽग्नेः पक्षमुप दधाम्यूर्ध्वया त्वा दिशा

सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतयाऽग्नेः पृष्ठेनाऽग्नेः पृष्ठमुप दधामि यो वा अपात्मानमग्निं चिनुतेऽपात्माऽमुष्मिँल्लोके भवति यः सात्मानं चिनुते सात्माऽमुष्मिँल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाऽग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेद॥[३६]

श्यैतत्वं प्रतीच्या त्वा दिशा सादयामि यस्सात्मानञ्चिनुते द्वाविग्ंशतिश्च||5.5.8||

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्माऽग्ने दुध्र गह्य किग्ंशिल वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रो [३७] द्वितीयो गह्यस्तृतीयः किग्ंशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च प्र दहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाङ्छमयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रम्बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनूः [३८] तनुवा मे सह नमस्ते अस्तु मा मा हिग्ंसीरप वा एतस्मात्प्राणाः क्रामन्ति योऽग्निं चिन्वन्नधिक्रामति वाङ्म आसन्नसोः प्राण इत्याह प्राणानेवाऽऽत्मन्धत्ते यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागा [३९] अन्ये शतरुद्रीयग्ं हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनग्ं शमयति तस्य त्वै शतरुद्रीयग्ं हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात्पान्तु पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः पश्चात्पान्तु

द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु [४०] देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यथ्संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः॥[४१]

दुध्रस्तनूरहविर्भागाः पातु द्वात्रिग्ं शच्च॥5.5.9॥

समीची नामाऽसि प्राची दिक्तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाऽधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधाम्योजस्विनी नामाऽसि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकुः प्राची नामाऽसि प्रतीची दिक्तस्यास्ते [४२] सोमोऽधिपतिः स्वजोऽवस्थावा नामाऽस्युदीची दिक्तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजिरधिपत्नी नामाऽसि बृहती दिक्तस्यास्ते बृहस्पतिरधिपतिः श्वित्रो वशिनी नामासीयं दिक्तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाऽधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च [४३] नो द्वेष्टि तं वां जम्भे दधाम्येता वै देवता अग्निं चितग्ं रक्षन्ति ताभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च ध्यायेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाङ्छमयति नाऽऽर्तिमार्छत्यध्वर्युर्न यजमानो हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः सलिलो निलिम्पा नाम [४४] स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहाः स्वप्नो व इषवो गह्वरोऽवस्थावानो नाम स्थ तेषां व उत्तरादृहा आपो व इषवः समुद्रोऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान्क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा [४५] अन्नं व

इषवोऽनिमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर्जुहोति भागधेयेनैवैनान्प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इत्यनु- [४६] परिक्रामं जुहोत्यपरिवर्गमेवैनान्प्रीणातीमग्ग् स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये। उथ्सं जुषस्व मधुमन्तमूर्व समुद्रियग्ं सदनमा विशस्वा॥ यो वा अग्निं प्रयुज्य न विमुञ्चति यथाऽश्वो युक्तोऽविमुच्यमानः क्षुध्यन्पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूक्षो [४७] भवतीमग्ग् स्तनमूर्जस्वन्तन्धयाऽपामित्याज्यस्य पूर्णाग् स्त्रुचं जुहोत्येष वा अग्नेर्विमोको विमुच्यैवाऽस्मा अन्नमपि दधाति तस्मादाहुर्यश्चैवं वेद यश्च न सुधायग्ं ह वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत्प्रीणाति स एनं प्रीतः प्रीणाति वसीयान्भवति॥[४८]

प्रतीची दिक्तस्यास्ते द्विष्मो यश्च निलिंपा नामेह गृहा इति लूक्षो वसीयान्भवति॥5.5.10॥

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिग्ंशुमारो हिमवतो हस्ती॥[४९]

इन्द्राय राज्ञेऽष्टाविग्ंशतिः॥5.5.11॥

मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदग्ंशस्ते धातुः सरस्वत्यै शारिः श्येता

पुरुषवाक्सरस्वते शुकः श्येतः पुरुषवागारण्योऽजो नकुलः शका ते पौष्णा वाचे क्रौञ्चः॥[५०]

मयुस्रयेविग्ंशतिः||**5.5.12**||

अपां नप्त्रे जषो नाक्रो मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः॥[५१]

अपामेकान्न विग्ंशतिः||**5.5.13**||

बलायाऽजगर आखुः सृजया शयण्डकस्ते मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कुंभीनसः पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः॥[५२]
||**5.5.14**||

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्रियै पिकः क्ष्विङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः॥[५३]
||**5.5.15**||

सौरी बलाकरश्यो मयूरः श्येनस्ते गन्धर्वाणां वसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित्कुण्डृणाची गोलत्तिका ता अप्सरसामरण्याय सृमरः॥[५४]
||**5.5.16**||

पूषतो वैश्वदेवः पित्वो न्यङ्कुः कशस्तेऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः

क्वयिः कुटरुर्दात्यौहस्ते सिनीवाल्यै बृहस्पतये शित्पुटः॥[५५]
||5.5.17||

शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणामृतूनां जहका संवथ्सराय लोपा कपोत उलूकः शशस्ते नैर्ऋताः कृकवाकुः सावित्रः॥[५६]
बलाय पुरुषमृगस्सोरी पृषतः शकाऽष्टादशाष्टादश॥**5.5.18**॥

रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गस्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतरजनानामग्नये धूङ्क्षणा॥[५७]
रुरुर्विग्ंशतिः॥**5.5.19**॥

अलज आन्तरिक्ष उद्रो मद्गुः प्लवस्तेऽपामदित्यै हग्ंससाचिरिन्द्राण्यै कीर्शा गृध्रः शितिकक्षी वार्ध्राणसस्ते दिव्या द्यावापृथिव्या श्वावित्॥[५८]
||5.5.20||

सुपर्णः पार्जन्यो हग्ंसो वृको वृषदग्ंशस्त ऐन्द्रा अपामुद्रोऽर्यम्णे लोपाशः सिग्ंहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान्॥[५९]
अलजस्सुपर्णोऽष्टादशाष्टादश॥**5.5.21**॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः

सग्ंहितोऽधोरामः सावित्रो वारुणः पेत्वः॥[६०]

आग्नेयो द्वाविग्ंशतिः||**5.5.22**||

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः॥[६१]

अश्वष्षोडस||**5.5.23**||

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः कृष्ण एकशितिपात्पेत्वः॥[६२]

अग्नयेऽनीकवते द्वाविग्ंशतिः||**5.5.24**||

यदेकेन प्रजापतिः प्रेणाऽनु यजुषाऽऽपो विश्वकर्माऽग्न आ याहि सुवर्गाय वज्रो गायत्रेणाऽग्न उदधेसमीचीन्द्राय मयुरपां बलाय पुरुषमृगस्सौरी पृषतश्शका रुरुरलजस्सुपर्ण आग्नेयोऽश्वोऽग्नयेऽनीकवते चतुर्विग्ंशतिः चतुर्विग्ंशतिः||**24**||

यदेकेन स पापीयानेतद्वा अग्नेर्धनुस्तद्देवास्त्वेन्द्र ज्येष्ठा अपान्नप्त्रेऽश्वस्तूपरो द्विषष्टिः||**62**||

यदेकेनैकशितिपात्पेत्वः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति पञ्चम काण्डे पञ्चमःप्रश्नः॥